दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदकृष्णाष्टमी
भाद्रपद 19 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-315 | 1 | सितम्बर 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 न्यूयॉर्क-नगरे समायोजितायां गोष्ठ्याम् वित्त-मन्त्रिणा निर्मला सीतारमण इत्यनया भारतस्य आर्थिक-सामर्थ्य प्रदर्शितम्

5 लघ्वीकाशयां मण्ड्यां सोत्साहं सम्पन्नः जनपदस्तरीयः संस्कृत-सप्ताहमहोत्सवः, १३५ बाल-प्रतिभागिनः प्रदर्शितवन्तः स्वप्रतिभाम्

9 कृष्णावतारकाले समाजस्य स्थितिः (पर्वविशेषः) डॉ.विमलेशः




## भारत-बेल्जियम देशयोः व्यापारो द्विगुणी-भविष्यति; प्रधानमन्त्रिणा मोदिना बेल्जियम-मन्त्रिणा बार्ट-डी-वीवर् इत्यनेन सह नवदेहल्यां विहिता शिखर वार्ता





हिमसंस्कृतवार्ता। भारत-बेल्जियमदेशाभ्यां रक्षा-सहयोग-विषयकेण आशय-पत्रेण साकं नवीकरणीय-ऊर्जा, अन्ताराष्ट्रिय-अपराध-दमनं, राजनयिक-प्रशिक्षणं चेत्यादिषु क्षेत्रेषु सहमति-पत्राणि हस्ताक्षरीकृतानि । प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां बेल्जियम्-देशस्य प्रधानमन्त्रिणा बार्ट् डी वेवर इत्यमुना सह द्वैपाक्षिकीं मन्त्रणाम् अकरोत्। उभौ नेतारौ द्वैपाक्षिक-सम्बन्धानां समग्रपक्षैः सह परस्पर-हित-सम्बद्धानां क्षेत्रीय-वैश्विक विषयाणां विशदतया समीक्षां विहितवन्तौ। स्वकीये वक्तव्ये प्रधानमन्त्री मोदी प्रावोचत् यत् सम्पूर्ण विश्वं महतः विप्लवस्य सङ्घर्ष स्थितेश्च काल-खण्डेन गच्छदस्ति। खाद्य-इन्धन-आपूर्ति-शृङ्खलादिषु सर्वेषु क्षेत्रेषु अनिश्चिततायाः प्रभावः दृश्यते, किन्तु एतादृशे काठिन्यमये वातावरणे अपि भारतस्य अर्थव्यवस्था स्वकीयां गतिशीलतां रक्षयति। विगत त्रैमासिके भारतेन सप्तदशांश-अष्ट-प्रतिशतन्मिता आर्थिक वृद्धिः समङ्ङ्किता । सः न्यगादीत् यत् भारतस्य विकास-यात्रा अद्य विश्वस्य कृते विश्वासस्य नूतनावसराणां च स्रोतभूता विद्यते। सेमीकण्डक्टर-क्षेत्रे बेल्जियम-देशस्य विशेषज्ञता अथ च भारतस्य विपुल-विस्तारः परस्परं पूरकौ स्तः। अस्मिन् सन्दर्भे बेल्जियम-देशस्य आईमैक् संस्थानं भारतस्य सेमीकण्डक्टर-परिवेशेन सह संयोजयितुं कार्यं करिष्यति।

रक्षा-मन्त्रिणा राजनाथ सिंहेन बेल्जियम् मन्त्रिणा थिओ-फ्रैड्कन् इत्यनेन सह क्षमता-निर्माणाय कृता मन्त्रणा।

अपरत्र, बेल्जियम-प्रधानमन्त्री बार्ट् डी वेवर भारतं विश्वस्य बृहत्तम-लोकतान्त्रिक-देशत्वेन तीव्रतम-प्रवर्धमान-अर्थव्यवस्थारूपेण च श्लाघमानः प्रमुख-वैश्विक-महाशक्तित्वेन च अभिहितवान्। इतः पूर्वम् रक्षा-मन्त्री राजनाथ सिंहः स्व-समकक्षेण बेल्जियम्-रक्षामन्त्रिणा थियो फ्रैड्केन् इत्यमुना सह शिष्टमण्डल-स्तरीय-वार्ताम् अकरोत्।

## अद्यतनीयं सुभाषितम्

**इह लोकेऽपि धनिनां परोऽपि स्वजनायते।**
**स्वजनोऽपि दरिद्राणां तत्क्षणाद्दुर्जनायते।।**

भावार्थः- इस संसार में धनवानों से अनजान व्यक्ति भी सम्बन्धियों की तरह सद्व्यवहार करते हैं, परन्तु दरिद्र व्यक्तियों से उनके अपने सम्बन्धी भी तुरन्त उनके साथ दुष्ट व्यक्तियों जैसा व्यवहार करते हैं।




रविः खरिडेहालः - बेङ्गलूरु।

## "एआई प्रौद्योगिकी जलसंरक्षार्थं नुदति"

जलदत्तांशः एआइ प्रौद्योगिक्या दृढशासनं प्राथमिकता आवश्यकता अस्ति। तस्य अर्थः अस्ति यत् जलस्य व्यवस्थितः संग्रहः, जलस्य व्यवस्थितं विश्लेषणं, जलस्य व्यवस्थितः उपयोगः च । एतेन जलस्य अभावस्य निवारणे सहायकं भविष्यति, जलसम्पदां योजनासु उत्कर्षः भविष्यति । जलसम्पदां कृते प्रथमम् एतादृशानां शिखरसम्मेलनानां श्रृङ्खलायां प्रधानमन्त्रिणा जलविभागं सम्बोधितम्। विश्वविद्यालयेभ्यः जलप्रबन्धनार्थं क्षमतानिर्माणं कर्तुं कथितम् आसीत् । व्यवस्थितनियोजनेन सक्षमनेतृत्वेन च अभावं अवसरे परिणतुं शक्यते।

## केन्द्रीय रेलवे-मन्त्री अश्वनीवैष्णवः नवदेहल्याम् आभासीय-माध्यमेन मुम्बईतः सिन्धुदुर्ग-पर्यन्तं गच्छतः द्रुतगामि-रेलयानस्य हरित-पताका-प्रदर्शन-समारोहं सम्बोधितवान्

केन्द्रीय रेलवे-मन्त्री अश्विनी वैष्णवः प्रतिपादितवान् यत् भारतीय-रेलवे विभागेन वहन-क्षमता-वृद्ध्यै, संकेतन-प्रणाल्याः उन्नयनाय, अथ च स्वयञ्चालित-द्वार-सौविध्ययुक्तानां उपनगरीय रेलयानानां प्रचालनार्थं सुव्यवस्थितं कार्यं विधीयते। सः अवदत् यत् मुम्बई-नगरे सम्प्रति अष्टादश-सहस्र-कोटि-रूप्यकाणां रेलवे-परियोजनानां कार्यं प्रगति-पथी वर्तते। श्रीवैष्णवः नवदेहल्याम् आभासीय-माध्यमेन मुम्बईतः सिन्धुदुर्ग-पर्यन्तं गच्छतः द्रुतगामि-रेलयानस्य हरित-पताका-प्रदर्शन-समारोहं सम्बोधयन्नासीत्। मन्त्रिणा स्पष्टीकृतं यत् पूर्व-पश्चिमयोः समर्पित-वस्तुवाहन-मार्गौ जवाहरलाल-नेहरू-पत्तनात् देशस्य अन्य भागेषु वस्तु-परिवहनं सौविध्ययुतं विधाय महाराष्ट्रस्य औद्योगिक विकासं भृशं सुदृढयिष्यति ।



## न्यूयॉर्क-नगरे समायोजितायां गोष्ठ्याम् वित्त-मन्त्रिणा निर्मला सीतारमणे इत्यनया भारतस्य आर्थिक-सामर्थ्य प्रदर्शितम्



वित्तमन्त्री निर्मला सीतारमण न्यूयार्क-नगरे वैश्विकानाम् उद्योगपतीनां गोष्ठ्याम् भारतस्य आर्थिक-सामर्थ्यं प्रदर्शितवती। सा अवदत् यत् प्रथमे त्रैमासे सप्त दशांश अष्ट प्रतिशतस्य विकासेन भारतम् अद्य अपि विश्वस्य द्रुततम-वर्धमाना अर्थव्यवस्था अस्ति। प्रधानमन्त्रिणः मोदिनः मार्गदर्शने कृताः आर्थिक परिष्काराः व्यापार-सुगमतां वर्धितवन्तः। वित्तमन्त्रिणा वैश्विक अनिश्चिततासु अपि भारतस्य वित्तीय-अनुशासनस्य प्रतिबद्धता दृढीकृता।

## वाराणसी-संसदीय क्षेत्रे वर्धमान-जलौघं विलोक्य प्रधानमन्त्री मोदी सकलां स्थितिं पप्रच्छ



वाराणसी-संसदीय क्षेत्रे वर्धमान जलौघं विलोक्य प्रधानमन्त्री मोदी मण्डलाधिकारिणं दूरभाषेण आहूय सकलां स्थितिं पप्रच्छ। तेन आपद्-उद्धार-कार्याणि त्वरितुम् आदेशो निर्गतः। अन्यत्र उत्तर-प्रदेश-मुख्यमन्त्रिणा योगिना फरुखाबाद-मण्डले आप्लाव-विभीषिकां समीक्षितुम् आकाशीय-यात्रा विहिता, पीडित जनेभ्यः च भोजन-वैद्यकीय-सहायता-प्रदानाय निर्देशो दत्तः।

## ऋतु-विभागेन देशस्य विभिन्नेषु राज्येषु ऋतु-विभागेन वृष्टिपरा संचेतना प्रख्यापिता

देशस्य विभिन्नेषु राज्येषु ऋतु-विभागेन वृष्टिपरा संचेतना प्रख्यापिता। पूर्व-मध्य-प्रदेशे अति-वृष्टेः सम्भावनाम् अधिकृत्य 'ऑरेंज-अलर्ट' इति संचेतना च निर्गता। सहैव तावत् बिहार-उत्तराखण्ड-समेत्य-सप्त-राज्येषु मेघगर्जनैः वज्रपातैः च सह अति-वृष्टिः भविष्यतीति पूर्वानुमानं प्रकटितम्।



## केन्द्रीय-गृह-सचिवः गोविन्द मोहनः हिमालयी राज्यानाम् अधिकारिभिः सह उच्च-स्तरीय-समीक्षोपवेशनं कृतवान्

केन्द्रीय-गृह-सचिवः गोविन्द मोहनः हिमालयी राज्यानाम् अधिकारिभिः सह उच्च-स्तरीय-समीक्षोपवेशनं कृतवान्। तेन हिम-सरोवराणां विस्फोटेन सम्भाव्यमान-जलप्लावनस्य हिम-स्खलनस्य च विपद् सम्मुखीकरणाय सतत सतर्कता-पालनाय निर्देशो दत्तः। सचिवेन संसूचितं यत् आपद्-प्रबन्धनदलैः सङ्कटग्रस्त-क्षेत्रेषु चतुर्विंशतिः होराः तीव्र-दृष्टिः स्थापनीया।

## भारतस्य सर्वोच्च-न्यायालयः नवदेहल्यां 'ब्रिक्स्-मुख्यन्यायाधीश-मञ्चस्य' आयोजनं विधास्यति



भारतस्य सर्वोच्च-न्यायालयः नवदेहल्यां 'ब्रिक्स्-मुख्यन्यायाधीश-मञ्चस्य' आयोजनं विधास्यति। अस्मिन् सम्मेलने ब्रिक्स देशानां तथा सहयोगी-राष्ट्राणां मुख्यन्यायाधीशाः सहभागिनो भविष्यन्ति। भारतस्य मुख्यन्यायाधीशः सूर्यकान्तः उद्घाटन-दिवसे रूस-चीन-इजिप्ट-इण्डोनेशिया देशानां न्यायिक नेतृभिः सह द्विपक्षीय वार्ता करिष्यति। अस्याः गोष्ठ्याः मुख्यम् उद्देश्यं न्याय-वितरणे प्रौद्योगिकी-उपयोगं तथा अन्ताराष्ट्रिय-विवाद-निवारणं प्रति सहकार्यं वर्धयितुम् अस्ति।

## किदाम्बी श्रीकान्तः 'चीन-मास्टर्स' बैडमिण्टन्-स्पर्धायाः अन्तिम-अष्ट-चक्रं प्राविशत्

भारतीय-बैडमिण्टन्-क्रीडकेन किदाम्बी श्रीकान्तेन चीन-मास्टर्स-स्पर्धायाम् विजय-पताका उच्छ्रिता । तेन विश्व-वरीयं विक्टर्-लाइ-इत्यमुं-पराजित्य चतुर्थांश-अन्तिम-चक्रे प्रवेशः सम्प्राप्तः ।



## हिमानी-ह्रदानां विदारण-हिमस्खलनाभ्यां सम्मुखीभवनाय केन्द्रेण दत्ताः निर्देशाः; प्रोक्तं — संवेदनशील-क्षेत्राणां निरन्तरं क्रियताम् अवबोधनम्

**हिमसंस्कृतवार्ता — नवदेहली।**

हिमालीय-राज्येषु हिमानी-ह्रद-विस्फोटेन (GLOF) हिमस्खलनेन च जायमानस्य विनाशस्य निवारणाय केन्द्र-सर्वकारेण सज्जीकरणं तीव्रं कर्तुं निर्देशाः प्रसारिताः। केन्द्रीय-गृह-सचिवः गोविन्दमोहनः नवदेहल्याम् उत्तराखण्ड-हिमाचलप्रदेश-सिक्किम-अरुणाचलप्रदेश-जम्मूकाश्मीर-प्रभृतीनां राज्यानां मुख्य-सचिवैः आपदा-प्रबन्धन-अधिकारिभिश्च सह उपवेशनं कृत्वा सज्जीकरणस्य समीक्षां कृतवान्।

उपवेशने संवेदनशीलानां हिमानी-सरोवराणां हिमस्खलन-सम्भावित-क्षेत्राणां च सततं निरीक्षणं, विपदः पूर्व-सूचना-प्रदानं, समये एव च जनान् सुरक्षित-स्थानेषु प्रापणं चेत्यादिषु विषयेषु विशेषं बलं दत्तम्। उपवेशने सङ्कट-युक्तानां क्षेत्राणां परिज्ञानेन सहैव एतन्निर्धारणाय अपि निर्देशाः दत्ताः यत् अकस्मात् जलौघ-स्थितौ तस्य प्रवाहः कैः मार्गैः भवितुं शक्नोति। साकमेव सङ्केत-प्राप्त्यनन्तरं सा पूर्व-सूचना ग्रामान् बस्ति-क्षेत्राणि च यावत् झटिति सम्प्रेषयितुं व्यवस्था सुदृढा क्रियेत।

**संस्थानां मध्ये सुदृढ-समन्वयस्य निर्देशः**

मण्डल-प्रशासनस्य, राज्य-संस्थानां, वैज्ञानिक-प्रतिष्ठानानां च मध्ये उत्तम-समन्वयस्य अपि निर्देशाः दत्ताः। केन्द्रीय-गृह-सचिवः अवदत् यत् आपदः आगमनात् परं रक्षण-कार्यस्य सम्पादनापेक्षया पूर्वमेव विपदम् अवबुध्य सज्जीभवनम् आवश्यकं वर्तते। एतदर्थं संवेदनशीलानां हिमानी-ह्रदानां हिमस्खलन-प्रवण-क्षेत्राणां च निरन्तरं निरीक्षणं क्रियेत। निष्कासन-मार्गाणां, रक्षण-संसाधनानां, स्थानीय-स्तरे च जनानां सज्जीकरणस्य समये-समये परीक्षणं करणीयम्। तेन २०२४ तमे वर्षे केन्द्र-सर्वकारेण अनुमोदितायाः 'हिमानी-ह्रद-आपदा-निवारण-परियोजनायाः' त्वरित-क्रियान्वयनस्य अपि निर्देशाः दत्ताः। उपवेशने राज्यैः स्व-सज्जीकरणस्य सङ्कट-क्षेत्राणां च विषये विवरणाणि प्रदर्शितानि। अधिकारिणः निर्दिष्टाः यत् सचेतना-व्यवस्थायां यानि अपि न्यूनताः सन्ति, ताः कस्यापि बृहत्-दुर्घटनायाः पूर्वमेव दूरीक्रियन्ताम्, येन हिमालीय-क्षेत्रेषु जन-धनयोः हानिः न्यूनातिन्यूना भवेत्।

# कैग-प्रतिवेदने पटाक्षेपः- ई-निविदातः जी. एस. टी. पर्यन्तं व्यवस्थायां छिद्राणि, सर्वकारीयोपक्रमेषु वर्धितः हानिभारः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे सर्वकारीयक्रयणे, जी.एस.टी. व्यवस्थायां, सर्वकारीय-कम्पनीनां कार्यप्रणाल्यां च अनेकाः प्रमुखाः न्यूनताः प्रकाशं गताः। मार्च २०२३ पर्यन्तं समाप्तायाः अवधये भारतस्य नियन्त्रक- महालेखापरीक्षकस्य (कैग) प्रतिवेदने अस्य उद्घाटनं कृतम् अस्ति। प्रतिवेदने ई- प्रोक्योरमेण्ट, ई-वे बिल, जी.एस.टी. विवरणपत्रस्य परीक्षणं तथा सर्वकारीय-कम्पनीनां वित्तीयस्थितेः समीक्षा कृता अस्ति।

सर्वकारेण वर्षे २०११ ई-प्रोक्योरमेण्ट-व्यवस्था प्रारब्धा आसीत्। अस्याः उद्देश्यं सर्वकारीय-क्रयणे पारदर्शितां तथा प्रतिस्पर्धां वर्धयितुम् आसीत्। तथापि सितम्बर २०२४ पर्यन्तं त्रयः मॉड्यूल आरब्धुं न शक्यन्ते स्म। तेषु अभ्यर्थना-प्रबन्धनं, सूची-प्रबन्धनं, संविदा-प्रबन्धनं च अन्तर्भवन्ति। विक्रेता-प्रबन्धनम्, ई-ऑक्शन, ई-पेमेंट चापि पूर्णरूपेण कार्यान्वितानि न अभवन्।

कैग-संस्थया अप्रैल् २०१८ तः मार्च २०२३ पर्यन्तं ८३ क्रय-संस्थानानां ७७,१५२ निविदानां दत्तांशस्य परीक्षणं कृतम्। अस्मिन् १६ क्रय-एककानि पटलस्य उपयोगमेव न कुर्वन्ति। १५ एककैः पञ्चवर्षेषु पोर्टले १० तः अपि न्यूनाः निविदाः स्थापिताः। ५० करदातृणां विस्तृतपरीक्षणे २९ जनैः आवश्यकाः अभिलेखाः न दत्ताः। २१ प्रकरणेषु अभिलेखाः अपूर्णाः प्राप्ताः। परीक्षणे १९ एतादृशाः न्यूनताः प्राप्ताः, येषां कुलराजस्वप्रभावः २,६९०.२८ कोटि-रूप्यकाणि आसीत्। एतासु न्यूनतासु अनुचितरीत्या आई.टी.सी. (ITC) ग्रहणम्, व्यवसायस्य गोपनम् तथा रिवर्स- चार्ज- अन्तर्गतं अनुचितकरप्रदानम् इत्यादयः विषयाः सम्मिलिताः सन्ति।

## एकस्मादेव आईपी-सङ्केतात् निविदाः, कूटसन्धेः आशङ्का

परीक्षणे कतिपयासु निविदासु एतादृशाः सङ्केताः प्राप्ताः, येन निविदादातृणां मध्ये कूटसन्धेः आशङ्का उत्पन्ना। कतिपयेषु प्रकरणेषु अल्पकालान्तराले एकस्मादेव अथवा विभागीय- आईपी- पत्तनात् निविदाः समर्पिताः। कतिपयासु निविदासु मूल्यस्य अन्तरमपि अत्यल्पम् आसीत्।

निविदाः निर्धारितसीमां परिहर्तुं लघुभागेषु विभाजिताः इत्यादीनि प्रकरणान्यपि प्राप्तानि।

कैग- संस्थया उक्तं यत् पटले एतादृशान् सन्दिग्धान् प्रकरणान् ज्ञातुं तथा अधिकारिभ्यः तत्क्षणं सूचनां दातुं व्यवस्था नासीत्।वर्षे २०२०-२१ मध्ये २५६ प्रकरणेषु ४१.५६ कोटि- रूप्यकाणाम् उद्ग्रहणमस्य कृते डी.आर.सी.-०७ निर्गताः। त्रिभ्यः वर्षेभ्यः अधिकः समयः व्यतीतः, तथापि ७५ प्रकरणेषु केवलं २.०९ कोटि- रूप्यकाणाम् उद्ग्रहणम् कर्तुं शक्या। कैग-संस्थया ६२७ प्रमुखाः दत्तांश-अन्तराः ज्ञाताः। तेषु २०७ प्रकरणेषु विभागेन किमपि उत्तरं न दत्तम्। एतेषु प्रकरणेषु ५६९.६७ कोटिरूप्यकाणाम् आशंकासम्बद्धः आसीत्।

## जी.एस.टी.-मध्ये १२१ कोटि-रूप्यकाणां व्यवसायस्य गोपनस्य सङ्केतः, २१.८४ कोटि-रूप्यकाणां सम्भावित-करदायित्वम्

वर्षे २०२०-२१ मध्ये १० सर्कल-क्षेत्राणां ३२३ करदातृभिः ५६९ करविवरणेषु २.४३ कोटि-रूप्यकाणां टी.डी.एस. प्रदर्शितः। तथापि जी. एस. टी. आर. ३बी मध्ये करयोग्यव्यवसायः शून्यः इति दर्शितः।

कैग-संस्थायाः अनुसारं अनेन १२१.३३ कोटि- रूप्यकाणां व्यवसायस्य गोपनस्य सङ्केतः प्राप्यते। अस्मिन् विषये प्रायः २१.८४ कोटि-रूप्यकाणां जी. एस. टी. दायित्वं भवितुं शक्नोत्।

## ई-वे बिल-व्यवस्थायां न्यूनताभिः १४.४३ कोटि-रूप्यकाणां राजस्वहानिः

कैग-संस्थायाः परीक्षणे ज्ञातं यत् एकेनैव चालानेन एकाधिकानि ई-वे बिल् निर्मातुं शक्यन्ते स्म। बहुषु प्रकरणेषु करदातृभिः करविवरणं तु प्रवेशितम्, किन्तु सम्पूर्णकरः न दत्तः। अनेन सर्वकारीयकोषस्य १४.४३ कोटि-रूप्यकाणां हानिः अभवत्।

४५ करदातृणां १२० ई-वे देयकानां परीक्षणे ९ करदातृभिः ३३५.२६ कोटि-रूप्यकाणां आई. टी. सी. गृहीतः, यद्यपि ते केवलं ३१४.९२ कोटि- रूप्यकाणां आई.टी.सी. इत्यस्य अधिकारिणः आसन्। अर्थात् २०.३४ कोटि-रूप्यकाणां अतिरिक्तः आई.टी.सी. गृहीतः।

# ओपीएस न राजनीतिकः निर्णयः, अवशिष्टेभ्यः कर्मचारिभ्यः अपि दास्यामः; सदने अवदत् मुख्यमन्त्री सुक्खू-महोदयः

**हिमसंस्कृतवार्ता — शिमला।**

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अवदत् यत् हिमाचलस्य सर्वेभ्यः योग्य-कर्मचारिभ्यः राज्य-सर्वकारः पुरातन-निवृत्तिवेतन-योजनायाः लाभं प्रदास्यति। सत्ता-प्राप्त्यनन्तरं प्रथमे एव मन्त्रिमण्डल-उपवेशने सर्वकारेण कर्मचारिभ्यः ओपीएस-प्रदानस्य निर्णयः स्वीकृतः आसीत्। एषः राजनीतिक-लाभाय निर्णयः नासीत्। प्रदेशे ओपीएस-योजनायाः ये केऽपि अवशिष्टाः प्रकरणाः भविष्यन्ति, तेभ्यः सर्वेभ्यः सर्वकारः अस्याः लाभं वितरिष्यति। मुख्यमन्त्री वर्षर्तु-सत्रस्य प्रश्नोत्तर-काले विधायकस्य डॉ. जनकराजस्य प्रश्नस्य प्रत्युत्तरं यच्छन् आसीत्। वस्तुतः विधायकेन प्रश्नः उत्थापितः यत् ये पूर्व-कर्मचारिणः सेवानिवृत्ताः अभवन्, ते एनपीएस-अन्तर्गताः (NPS) आसन्; धन-समर्पणानन्तरम् अधुना ते न तु ओपीएस-लाभं प्राप्नुवन्ति, न च एनपीएस-लाभम्।

अस्मात् पूर्वं विधायकस्य दीपराजस्य मूल-प्रश्नस्य उत्तरं यच्छन् मुख्यमन्त्री अवदत् यत् पूर्वतनेन भाजपा-सर्वकारेण कर्मचारिणां दश-सहस्र-कोटि-रूप्यकाणां (१०,००० कोटि) देयताः अवशिष्टाः त्यक्ताः आसन्।



**मुख्यमन्त्री सुक्खु...**

यस्मिन् समये वयं सत्ताम् अगृह्णीम, प्रदेशः आर्थिक-सङ्कटे पतितः आसीत्। सर्वकारेण एतम् आहवानम् उल्लङ्घ्य ६७ वर्षाधिक-वयस्क-सर्वकारीय-कर्मचारिणां निवृत्तिवेतनस्य वेतनस्य च अवशिष्ट-राशेः (एरियर) भुक्तिः कृता। सः अवदत् यत् सर्वकारः निवृत्तिवेतन-भोक्तृणां (पेंशनर्स) कृते संवेदनशीलः अस्ति। सः विविधानां श्रेणीनां निवृत्तिवेतनस्य उल्लेखं सदने कुर्वन् न्यवेदयत् यत् तेषां लम्बिता राशिः प्रदत्ता अस्ति। मुख्यमन्त्रिणा प्रोक्तं यत् पूर्व-सर्वकारेण निर्वाचनात् प्रागेव षष्ठः वेतन-आयोगः प्रवर्त्तितः, किन्तु कर्मचारिभ्यः अधिकारिभ्यश्च केवलं ५० सहस्र-रूप्यकाणि एव रक्षितानि।

**पत्रकारैः सह वार्तायां मुख्यमन्त्रिणः वक्तव्यम्**

अपरपक्षे सदनस्य बहिः वार्ताहराणां प्रश्नानाम् उत्तरं ददत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः अवदत् यत् ६७ वर्षाधिकाः ये केऽपि निवृत्तिवेतन-भोक्तारः सन्ति, तेषां निवृत्तिवेतनस्य अवशिष्ट-राशिः पूर्णतया दत्ता; चतुर्थ-श्रेण्याः (Class Four) ये कर्मचारिणः ५८ वर्षानन्तरं सेवानिवृत्ताः, तेषामपि अवशिष्ट-राशिः प्रदत्ता। भाजपा-पक्षेण गमनावसरे निर्वाचनात् पूर्वं केवलं ५० सहस्र-रूप्यकाणि एव दत्तानि आसन्। मुख्यमन्त्रिणा प्रोक्तं यत् आरडीजी स्थगिते सत्यपि सर्वकारः मन्दं मन्दं निवृत्तिवेतन-भोक्तृभ्यः अवशिष्ट-राशिं यच्छति। १-१-२०१६ तः ३१-१-२०२२ पर्यन्तं तृतीय-श्रेण्याः (Class Three) प्रायः ५५ प्रतिशतम् अवशिष्ट-धनं दत्तम्। चतुर्थ-श्रेण्याः वेतन-अवशिष्टस्य विंशति-सहस्र-रूप्यकाणि (२०,०००) अस्माभिः वितरितानि। प्रथम-द्वितीय-श्रेण्योः कृते १-१-२०१६ अनन्तरस्य निवृत्तिवेतन-अवशिष्टस्य १५ प्रतिशतं दत्तम्। मुख्यमन्त्री अवदत् यत् यथा यथा अस्माकं स्थितिः सुदृढा भवति, तथा तथा वयं कर्मचारिणाम् अधिकारिणां च लम्बितानां देयतानां भुक्तिः कुर्मः। सः अवदत् यत् सर्वकारेण भ्रष्टाचारस्य गुप्त-द्वाराणि पिहितानि कृतानि, एकैकं रूप्यकं योजयित्वा च भुक्तिः क्रियते। सः स्पष्टीकृतवान् यत् सर्वकारः कर्मचारिणां निवृत्तिवेतन-वेतनयोः अवशिष्ट-राशिं न रोत्स्यति। सः न्यवेदयत् यत् राजकोषे (Treasury) यावत् धनम् आसीत्, तावत् सर्वकारेण दत्तम् अग्रे अपि दास्यते। कर्मचारिभिः अधिकारिभिश्च स्व-अधिकारः प्राप्तव्यः; सेवानिवृत्तैः कर्मचारिभिः प्रदेश-हिताय अहोरात्रं कार्यं कृतम्, तेभ्यः सर्वमपि देयं दास्यते, किन्तु तैः अपि किञ्चित् सहयोगः करणीयः।

**सर्वकारेण दत्तं २२२९ कोटि-रूप्यकाणां वेतन-निवृत्तिवेतन-अवशिष्टम्**

मूल-प्रश्नस्य लिखित-प्रत्युत्तरे मुख्यमन्त्री विज्ञापितवान् यत् प्रदेशस्य कठिनाम आर्थिक-स्थितिं विहाय सर्वकारेण अधुना यावत् २२२९ कोटि-रूप्यकाणां वेतन-निवृत्तिवेतनयोः अवशिष्ट-राशेः भुक्तिः प्रदेशस्य कर्मचारिभ्यः निवृत्तिवेतन-भोक्तृभ्यश्च कृता। सः न्यवेदयत् यत् लम्बितान् लाभान् सर्वकारः चरणबद्ध-रीत्या प्रयच्छति। प्रदेशस्य सर्वकारीय-विभागेषु निवृत्तिवेतन-भोक्तृणां कौटुम्बिक-निवृत्तिवेतन-भोक्तृणां च आहत्य सङ्ख्या १ लक्ष ९० सहस्रं (१,९०,०००) वर्तते।

# वेदप्रचारसप्ताहस्य जन्माष्टमीपर्वणश्च उपलक्ष्ये शिशुभिः भव्यं सांस्कृतिकायोजनम्



हिमसंस्कृतवार्ताः- डॉ विमलेश झा, भागलपुर

बिहारप्रदेशस्य डीएवी- पब्लिक- स्कूल- बरारी- भागलपुरविद्यालयस्य परिसरे वेदप्रचारसप्ताहस्य जन्माष्टमीपर्वणश्च उपलक्ष्ये नर्सरी, एलकेजी- कक्षायाः बालकैः बालिकाभिः भव्यं सांस्कृतिकायोजनं प्रस्तुतम्। अस्मिन् कार्यक्रमे लघु- लघुबालकाः बालिकाश्च श्रीकृष्णस्य राधायाश्च विविधवेषभूषां धृत्वा सम्पूर्णे विद्यालयपरिसरे सांस्कृतिकशोभां वर्धयन्तः आसन्। बालकैः बालश्रीकृष्णस्य विविधाः मनोहराः लीलाः प्रस्तुताः। केचन बालकाः हस्ते वंशीं धृत्वा श्रीकृष्णस्य बालरूपं प्रदर्शितवन्तः, अन्ये बालकाः व्रजवासिभिः सह क्रीडतःश्रीकृष्णस्य रूपं प्रदर्शितवन्तः, केचन बालकाः कुम्भस्थितं नवनीतं खादतः श्रीकृष्णस्य रूपं प्रदर्शितवन्तः, केचन शिशवः कुम्भं भञ्जतः श्रीकृष्णस्य रूपं प्रदर्शितवन्तः अपि च केचन बालकाः गोपीभिः सह क्रीडतः श्रीकृष्णस्य रूपं च प्रस्तुतवन्तः। अस्मिन् अवसरे बालकैः “श्रीकृष्ण गोविन्द हरे मुरारे, हे नाथ नारायण वासुदेव” इति भक्तिगीतस्य मनोहरं नृत्यप्रदर्शनमपि कृतम्। बालकानां मनोहरवेषभूषा, नृत्यं तथा कृष्णलीलानां सजीवप्रस्तुतिः सर्वेषां मनांसि आकृष्टवती। विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी अनिल कुमारमहोदयः अवदत्- “जन्माष्टमीपर्व अस्माकं कृते महत्त्वपूर्णं सन्देशं वहति। अस्माभिः एतादृशैः कार्यक्रमैः बालकेभ्यः बोधयितुं शक्यते यत् अस्माकं देशस्य प्रत्येकं बालकः श्रीकृष्णस्य आदर्शान् स्वजीवने धारयितुं शक्नोति। एतादृशैः सांस्कृतिककार्यक्रमैः बालकाः भारतीयसंस्कृतेः परम्परायाश्च परिचयं प्राप्नुवन्ति। भगवतः श्रीकृष्णस्य विचाराः सामान्यजनान् प्रति प्रेषणीयाः। एतदर्थं जन्माष्टमीपर्व अत्यन्तम् उपयुक्तम् अस्ति।” बालकानां उत्साहपूर्णेन प्रदर्शनेन सम्पूर्णं विद्यालयपरिसरं श्रीकृष्णभक्तेः भारतीयसंस्कृतेश्च भावनया परिपूर्णमभवत्। कार्यक्रमस्य सफलतायै अनुश्री, ममता, बेबीकुमारी, नेहा, श्लोका, सरितासिंहः, स्वीटी दत्ता इत्यादीनां विद्यालयस्य समस्तशिक्षक- शिक्षिकाणां तथा शिक्षकेतर-कर्मचारिणां भूमिका प्रशंसनीया आसीत्।




# टाटास्टीलकर्मचारिभ्यः अधिलाभांशस्य घोषणा

हिमसंस्कृतवार्ताः- डॉ विमलेश झा, जमशेदपुरम्।

टाटास्टीलप्रबन्धनस्य श्रमिकसङ्घस्य च मध्ये कर्मचारिणां अधिलाभांशराशिविषये सहमति सम्पन्ना जाता। इमं सहमतिमनुसृत्य कर्मचारिभ्यः अधिलाभांशरूपेण ३१५ कोटिरूप्यकाणि प्रदास्यन्ते। पुरातनश्रेण्याः कर्मचारिणां कृते अधिकतमं ४.५२ लक्षरूप्यकाणि अधिलाभांशरूपेण प्रदास्यन्ते। टाटास्टील-संस्थायाः प्रबन्धनिदेशकः, मुख्यकार्यपालनाधिकारी टी. वी. नरेन्द्रन तथा टाटाकर्मचारिसंघस्य अध्यक्षः सञ्जीव चौधरी ‘टुन्नु’ इत्यादीनां पदाधिकारिणां मध्ये सम्पन्नायां वार्तायां अधिलाभांशस्य विषये सहमतिः जाता। अनन्तरं प्रबन्धनस्य संघस्य च प्रतिनिधिभिः सहमतिसम्बद्धे पंजिकायां हस्ताक्षराणि कृतानि। गतवर्षे अधिलाभांशरूपेण ३०३.१२ कोटिरूप्यकाणि प्रदत्तानि आसन्। अतः अस्मिन् वर्षे गतवर्षस्य अपेक्षया ११.८८ कोटिरूप्यकाणां वृद्धिः अभवत्। प्रबन्धनिदेशकस्य टी. वी. नरेन्द्रेण सह सम्पन्नायां वार्तायाम् अधिलाभांशस्य राशौ वृद्धिः कृता तथा अन्ततः ३१५ कोटिरूप्यकाणां कृते सहमतिः सम्पन्ना अभवत्। अधिलाभांशस्य विषये सूचनां श्रुत्वा टाटास्टील-कर्मचारिषु हर्षः उत्साहश्च दृश्यते।









# लघ्वीकाश्यां मण्ड्यां सोत्साहं सम्पन्नः जनपदस्तरीयः संस्कृतसप्ताहमहोत्सवः, १३५ बालप्रतिभागिनः प्रदर्शितवन्तः स्वप्रतिभाम्

हिमसंस्कृतवार्ताः- मण्डी।हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद्- जनपदमण्डीद्वारा शिक्षाविभागस्य, जिला- शिक्षा एवं प्रशिक्षण- संस्थानस्य संयुक्तावधाने जनपदस्तरीयस्य संस्कृतसप्ताह- समारोप- महोत्सवस्य भव्यं गरिमामयं चायोजनं कृतम्। कार्यक्रमस्य विधिवद् शुभारम्भः जिला- शिक्षा एवं प्रशिक्षण-संस्थानस्य (DIET) मण्डी इत्यस्य प्रधानाचार्येण राजेशकुमारमहोदयेन दीपप्रज्वलनं कृत्वा विहितः। अस्मिन् मण्डलस्तरीयसमावेषे मण्डीजनपदस्य विभिन्नेभ्यः शिक्षाखण्डेभ्यः समागताः प्रायः १३५ बालप्रतिभागिनः सोत्साहं भागं गृहीत्वा स्वकीयाम् असाधारणां संस्कृतप्रतिभां प्रदर्शितवन्तः। समारोपसमारोहे मण्डलमण्डलस्य उपनिदेशकः (गुणवत्ता- शिक्षा- निरीक्षणं च) मीनाठाकुरमहोदया मुख्यातिथिरूपेण समागता। मुख्यातिथिमहोदयया विजेतृप्रतिभागिनः स्मृतिचिह्नैः प्रमाणपत्रैश्च समलङ्कृताः। एतेन सहैव संस्कृत- सप्ताहस्य अवसरे विद्यालयेषु प्रार्थनासभासु, संस्कृतप्रदर्शनीषु, संस्कृतनामकरण-अभियानेषु, तात्कालिक- संभाषणेषु आधुनिक- लघुचलच्चित्रनिर्माणेषु 'संस्कृतमय- वातावरणस्य' सृजनं कृतवन्तः निष्ठावन्तः शिक्षकाः 'संस्कृतसेवादूतः' इति प्रशंसापत्रेण विशेषरूपेण सम्मानीयन्ते स्म।

मुख्यातिथिमहोदयया मीनाठाकुर-महाभागया हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद्- जिलामण्डी अस्य अभिनवप्रयासस्य भूरिशः प्रशंसा कृता। सा स्वोद्बोधने न्यगादीत् यत् अद्यतने भौतिकतावादि-युगे छात्रान् दुर्व्यसनेभ्यः (मादकपदार्थादिभ्यः) दूरीकर्तुं, समभावं विकासयितुं, समाजे च सच्चरित्रवतां नागरिकाणां निर्माणार्थं देववाणी संस्कृतं तस्याश्च शाश्वताः सुसंस्काराः अतीव अनिवार्याः सन्ति।

प्रशंसनीयमिदं यत् अयं कार्यक्रमः हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद्- मण्डीजनपदस्य शिक्षकाणां परस्परसहयोगेनैव सम्पन्नः कृतः, यतो हि अत्र यत्किञ्चिदपि व्ययम् अभवत् तत् सर्वं शिक्षकैः स्वकीय- आर्थिक- सहयोगेनैव निर्व्यूढम्। अस्य कृते मुख्यातिथिमहोदयया तेषां भूरि-भूरि श्लाघा विहिता, भविष्ये च सर्वसम्भव-सहयोगाय आश्वासनं प्रदत्तम्।

अस्मिन् अवसरे जिला- शिक्षा- एवं- प्रशिक्षण- संस्थानस्य संकायसदस्याः, निर्णायक-मण्डली, विविधविद्यालयेभ्यः समागताः संस्कृतशिक्षकाः, अभिभावकाः, गणमान्याः संस्कृतप्रेमिणश्च समुपस्थिताः आसन्।

समारोहस्य अवसरे चतसृषु प्रमुखविधासु मण्डलस्तरीयप्रतियोगिताः आयोजिताः, यासां परिणामाः इत्थं सन्तिः

## श्लोकोच्चारण-प्रतियोगिताः-

प्रथमस्थानम्- कृतिका (विद्यालयः- पीएम श्री सरकाघाटम्)
द्वितीयस्थानम्- स्तुतिशर्मा (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः राजगढ़म्)
तृतीयस्थानम्- साक्षी देवी (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः रिस्सा)
चतुर्थस्थानम्- मुस्कान (विद्यालयः- राजकीय- उच्चपाठशाला बिजन-ढलवानः)

## संस्कृतगीत-प्रतियोगिताः-

प्रथमस्थानम्- अंशिका (विद्यालयः: वरिष्ठ- माध्यमिक- विद्यालयः वीर तुङ्गलः)
द्वितीयस्थानम्: अभिनवः (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः रिस्सा)
तृतीयस्थानम्: भूमिक गारला (विद्यालयः: पीएमश्री वरिष्ठ- माध्यमिक- विद्यालयः सरकाघाटम्)
चतुर्थस्थानम्- कबीरः (विद्यालयः- राजकीय- माध्यमिक- विद्यालयः पुरातनमण्डी)

## संस्कृतरूपसज्जाप्रतियोगिता

प्रथमस्थानम्- आञ्चल (विद्यालयः- पीएमश्री वरिष्ठ- माध्यमिक- विद्यालयः मण्डी)
द्वितीयस्थानम्- अरवीरा (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः घ्राणः)
तृतीयस्थानम्- अमनकुमारः (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः हटगड़म्)
चतुर्थस्थानम्- नैतिकः (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः बागी तुङ्गलः)

## संस्कृतप्रश्नोत्तरी-प्रतियोगिताः

प्रथमस्थानम्- वंशिका, कुञ्जनप्रिया च (विद्यालयः- उच्चपाठशाला बिजन-ढलवानः)
द्वितीयस्थानम्- तेजल, तेजसश्च (विद्यालयः- पीएमश्री वरिष्ठ- माध्यमिक- विद्यालयः मण्डी)
तृतीयस्थानम्- वंशिका, शिवमश्च (विद्यालयः- पीएमश्री वरिष्ठ- माध्यमिक- विद्यालयः कोटली)
चतुर्थस्थानम्- भूमिका, लिपाक्षी च (विद्यालयः- वरिष्ठ- माध्यमिक- विद्यालयः हटगड़म्)

# हिमालयीयायुर्वेदिक महाविद्यालये संहिता- सिद्धान्त- संस्कृतविभागद्वारा संस्कृतदिवसमुपलक्ष्य संस्कृतदिवसाचरणं समाचरितम्।



**हिमसंस्कृतवार्ताः- डोईवाला,**
सर्वादौ मुख्यातिथिः, प्राचार्यः अन्ये प्राध्यापकाश्च दीपं प्रज्वाल्य पुष्पार्चनं कृतवन्तः। वैद्यकीयाः छात्राश्च श्रीगणेशं स्मृत्वा धन्वन्तरिवन्दनामकुर्वन्। संस्कृतदिवसस्य प्रास्तविकभाषणे कार्यक्रमसंयोजकः डॉ. नवीन जसोला समुपस्थितानामतिथीनां परिचयं, स्वागतमभिनन्दनं च व्याहरन् प्रोक्तवान् यत् संस्कृतभाषा भारतस्य प्राणः। इयं न केवलमायुर्वेदस्य मूलमपितु सर्वशास्त्राणां, सर्वविद्यानां, सर्वकलानां, सर्वसंस्काराणां ज्ञानविज्ञानानां च मूलाधारः। अनया भाषया एव विविधपरम्पराणां संरक्षणं शक्यम्। इतः परं स्नेहासुमितौ च सांस्कृतिककार्यक्रमं सुष्ठुरीत्या सञ्चालयन्तौ कार्यक्रम- विवरणमुद्घोषितवन्तौ। तत्र प्रप्रथमं प्रथमवर्षीया छात्राः तनुश्री, तन्विका, रिधिमा, शगुन रिया च सुमधुरं मधुराष्टकं प्रस्तुतवत्यः। सुमितः अभिनवः, वासितः तन्मयः शुभमपाठकः, सक्षमः, परिशा, तेजस्विनी आदयः कालभैरवाष्टकस्य गानं, कृतवन्तः। छात्रा साहिबा देशभक्तिः इति कथां श्रावितवती। सौरभः तन्मय आदयः वैद्यः रोगिसम्भाषणम् इति* लघुहास्यनाटकम् अभिनीतवन्तः। ततः सपना मधुरस्वरोपेतं शिवताण्डवस्तोत्रं प्रस्तुतवती। रोहनः सुमितश्च आयुर्वेद संहितायाः दिनचर्याऽध्यायस्य आदर्शवाचनं कृतवन्तः। कार्यक्रमे मुख्यातिथिरुपेण संस्कृतभारती उत्तराञ्चलस्य प्रान्तसंघटनमन्त्रिः गौरवशास्त्रिवर्यः उपस्थितः आसीत्। तेनोक्तं यत् संस्कृतं सम्भाषणविधिना अतीव रुचिकरं सरलं च भवति। भारतीयज्ञानपरम्परायाः बोधश्च संस्कृतेन भवतीति। अस्माभिः संस्कृतस्य रक्षणमवश्यं करणीयं, इयं न केवला भाषा अपितु भारतस्य प्राणः वर्तते। अथ संस्कृतस्य सार्वकालिकतां, वर्तमाने तस्याः प्रासङ्गिकतां च प्रस्तुवन् महाविद्यालयस्य प्राचार्यः प्रो गौरिशंकरइन्दौरिया महोदयः उक्तवान् यत् संस्कृतभाषायाः समादरः न केवलं भारते अपि तु सकले विश्वे क्रियमाणः अस्ति। अतः भारतीयैस्तु संस्कृतम् अवश्यं पठनीयं मननीयं चिन्तनीयं चेति कथयन् संस्कृतदिनस्य सर्वान् धन्यवादपुरस्सरं शुभकामनाः अयच्छत्। कार्यक्रमस्यान्ते छात्र-छात्राः पुरस्कृताः। समागतानां धन्यवादज्ञापनं डा नवीन जसोला अकरोत्। समोरोपकाले सर्वे मिलित्वा कल्याणमन्त्रं पठितवन्तः। अस्मिन् अवसरे संहितासिद्धान्त एवं संस्कृतविभागस्य आचार्यः वैद्यः अजीतकुमारः वैद्या दीक्षातिवारी, डॉ. शालिनी पञ्चकर्मविभागतः प्रो. अरविन्दः डॉ. सपना, डॉ. रूपाली, डॉ. अक्षयः, क्रियाशरीरविभागस्य वैद्या अपेक्षानेगी, वैद्या काव्याकाला, वैद्या कल्पना, डॉ. पूजा, डॉ. वैशाली, डॉ. निधिगर्ग, डॉ. सीमा, अगदतन्त्र- विभागस्य वैद्यः सत्येन्द्रः, डॉ. प्रेरणा रचनाशरीरविभागस्य वैद्यः पङ्कजः वैद्या वैशाली, प्राकृतिक- योगचिकित्सा- विख्यातः डॉ.आरती, संस्कृतविभागतः डॉ. आनन्दजोशी, डॉ. सुभाष बडोला, उपस्थिताः आसन्। छात्रेषु शुभमः, स्नेहा आयुष, तृषः, दिव्यांशी जुबेरः, इफ्रा, काजुकोमला, तेजस्विनी आसन्।

# मिथिलायाः पारम्परिकलोक- चित्रकलायाः संरक्षणाय युवतीनां भव्या सहभागिता



**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, दरभङ्गा**
मिथिलायाः पारम्परिकलोकचित्रकलां नवसन्तत्या सह संयोजयितुं, युवतीकलाकाराणां च प्रतिभां प्रदर्शयितुं मञ्चं प्रदातुं पञ्जीकृतसंस्था 'मिथिला फोक आर्ट, दरभङ्गा' इत्यनया संस्थया एकदिवसीया युवा- महिला- मिथिलालोक- चित्रकला- प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां दरभङ्गाजनपदस्य १५-२५ वर्षीयाः शतं युवत्यः उत्साहपूर्वकं भागं गृहीत्वा स्वीयां चित्रकलाप्रतिभां प्रदर्शितवत्यः। प्रतियोगितायाः आयोजनं वरिष्ठ- मिथिला- चित्रकलाकारस्य राज्यपुरस्कारसम्मानितस्य प्रो. अञ्जुमिश्रस्य संरक्षणे सम्पन्नम् अभवत्। आयोजनस्य सफलतायै भाजपामहिलासंघस्य महामन्त्री मीना झा इत्यस्याः अपि पूर्णः सहयोगः प्राप्तः। प्रतियोगितायां युवाकलाकाराभिः मिथिलाचित्रकलायाः पारम्परिक- शैली, विविधवर्णाः, विषयवस्तु इत्येतेषां माध्यमेन स्वकीयां सृजनात्मकतां कलात्मकप्रतिभां च प्रदर्शितम्। तासां कलाप्रतिभया पारम्परिकमिथिलाचित्रकलायाः समृद्धिः सौन्दर्यं च प्रत्यक्षतया अभिव्यक्तम् अभवत्। प्रो. अञ्जुमिश्रः, मीना झा च अवदतां यत् युवाकलाकाराणां प्रोत्साहनाय एतादृशानि आयोजनानि भविष्येऽपि निरन्तरं आयोजनीयानि। एतेषां प्रयासानां माध्यमेन मिथिलायाः पारम्परिक- लोककलायाः संरक्षणं संवर्धनं च भविष्यति तथा नवसन्ततिः स्वस्य सांस्कृतिकमूलैः सह सम्बद्धा भविष्यति। आयोजकसंस्थया युवतीनां प्रतिभायाः सम्माननं, मिथिलायाः लोककलायाः संरक्षणं संवर्धनं च लक्ष्यीकृत्य कृतः अयं प्रयासः सांस्कृतिकदृष्ट्या महत्त्वपूर्णः अभिनन्दनीयश्च अस्ति।

## वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। मया अद्य चीनदेशस्य एका विचित्रा वार्ता पठिता। तत्र कार्यालयेषु कर्मकरैः आतपत्राणि आनीतानि। सङ्गणक- प्रकाशात् चर्मणः रक्षणाय तैः एतत् कृतम्।
नन्दिनी- अहो, एतत् अतीव हास्यास्पदम्। अन्तः एव आतपत्राणि धृतानि! अहम् अपरां वार्तां श्रुतवती अस्मि। तत्र चिलीदेशे व्रणित- पेन्विन- पक्षिभ्यः वैद्यैः रक्तवर्णानि ऊर्ण-वस्त्राणि दत्तानि। तैः वस्त्रैः पक्षिणां व्रणानां रक्षणं कृतम्।
काव्या- शोभनम्! पक्षिभिः तानि वस्त्राणि धृतानि इति चिन्तयित्वा अहम् आनन्दिता अस्मि। तैवानदेशस्य एका अपरा वार्ता मया दृष्टा। तत्र एकेन जनेन यन्त्र-सम्मार्जनी गुप्तचर-यन्त्ररूपेण उपयुक्ता। तेन स्व-कुटुम्बस्य वार्ताः श्रुताः। ततः सः जनः न्यायालयेन कारागारे क्षिप्तः।
नन्दिनी- कथम् एका सम्मार्जनी अपि गुप्तचर- कार्याय प्रयुक्ता! एतत् भयङ्करम्। चीनदेशे अपि एका महत्त्वपूर्णा रचना कृता। तत्र बालकैः विद्यालय- गमनाय एकः विशालः आरोहकः पर्वते प्राप्तः। पूर्वं बालकैः विद्यालयं गन्तुं भयङ्करं पर्वतारोहणं कृतम्। इदानीम् अभियन्तृभिः उन्नतस्य आरोहकस्य निर्माणं कृतं, येन यात्रा सुलभा जाता।
काव्या- एतत् उत्तमम्। बालकानां कष्टं दूरीकृतम्।

**-ईदर धीरजः**

# भक्तिरसोल्लासेन श्रीकृष्णजन्माष्टमी महोत्सवस्य आयोजनं कृतं डीपीएस बोकारो-विद्यालये




**संवाददाता प्रेरकः च -सौरभः दे बोकारो।** दिल्ली पब्लिक स्कूल, बोकारो इत्यत्र श्रीकृष्णजन्माष्टम्याः पूर्वसन्ध्यायां भक्तिभावेन हर्षोल्लासेन च परिपूर्णं विशेषप्रार्थनासभायाः तथा विविधसांस्कृतिककार्यक्रमाणां च आयोजनं कृतम्। पारम्परिकवेषभूषायां सुसज्जितैः बालकैः प्रस्तुतानि मनोहारिणः कार्यक्रमाः सर्वेषां मनांसि विशेषतः आकृष्टवन्तः।


प्राथमिकविभागे आयोजितायां विशेषप्रार्थनासभायां नर्सरी, प्रेप् तथा प्रथमकक्षायाः छात्रैः मनोहराः सांस्कृतिककार्यक्रमाः प्रस्तुताः। नन्हे बालकाः कृष्णस्य राधिकायाश्च स्वरूपं धृत्वा रमणीयाभिः वेशभूषाभिः सर्वान् मोहितवन्तः। नर्सरी-कक्षायाः बालकैः भक्तिरसपूर्णस्य 'अच्युतं केशवं' इति भक्तिगीतस्य भावपूर्णं प्रस्तुतिकरणं कृतम्।

प्रेप्-कक्षायाः छात्राः राधाकृष्णयोः मनोहरवेषं धृत्वा रंगारङ्गे 'राधा-कृष्ण-वेशभूषा-प्रदर्शने' आत्मविश्वासेन सहभागं कृतवन्तः तथा सर्वेषां हृदयानि जितवन्तः। प्रथमकक्षायाः छात्रैः सुन्दररीत्या संयोजितः श्रीकृष्णनृत्यकार्यक्रमः प्रस्तुतः। द्वितीयतः पञ्चमकक्षापर्यन्तं छात्रैः उत्साहपूर्वकं माखनपूर्णाः विविधवर्णीयाः मृद्घटाः, कलात्मकाः वंशिकाः तथा आकर्षकाः मयूरपिच्छमुकुटाः निर्मिताः। एतेन तैः स्वप्रियस्य श्रीकृष्णस्य प्रति सौन्दर्यपूर्णा श्रद्धाञ्जलिः समर्पिता।

वरिष्ठविभागस्य छात्रैः भक्तिरससमन्वितस्य भजनस्य मधुरं गायनं प्रस्तुतम्, येन सभागारः भक्तिभावेन आप्लावितः। छात्रा शाम्भवी झा श्रीकृष्णस्य महिमानं तथा श्रीमद्भगवद्गीतायां प्रतिपादितस्य 'निष्कामकर्मयोगस्य' शाश्वतसन्देशं च प्रकाशयन्ती प्रभावशालिनीं वक्तृतां प्रस्तुतवती। तया कर्तव्यपालने समर्पणस्य तथा कर्मफलस्य आसक्तिं विना कर्मकरणस्य महत्त्वं विशदीकृतम्।

विद्यालयस्य प्राचार्यः डा. ए. एस. गंगवारः श्रीकृष्णजन्माष्टम्याः पावनावसरे सर्वेभ्यः हार्दिकशुभकामनाः प्रदत्तवान्। सः अवदत्— "संस्कृतिः अस्माकं अस्तित्वस्य मूलभूतः सारः अस्ति। एतादृशाः सांस्कृतिकदृष्ट्या समृद्धाः उत्सवाः विद्यार्थिनः भारतस्य समृद्धपरम्परया गौरवपूर्णया सांस्कृतिकविरासतया च सम्बद्धान् कर्तुं प्रभावशालिनः माध्यमाः भवन्ति।"

प्राचार्यः अग्रे उक्तवान् यत् श्रीकृष्णः परमस्य ब्रह्माण्डीयस्य ऊर्जातत्त्वस्य पूर्णतमं स्वरूपम् अस्ति। जन्माष्टमी-महोत्सवः सतः असतश्च, धर्मस्य अधर्मस्य च मध्ये शुभस्य विजयस्य प्रतीकः अस्ति। यदा यदा समाजे अन्धकारः अन्यायश्च प्रबलौ भवतः, तदा धर्मः अन्ततः प्रकाशरूपेण मानवस्य मार्गं प्रदर्शयति—इति श्रीकृष्णस्य जीवनसन्देशः अस्मान् सततं प्रेरयति।



डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

## "संस्कृतकथामञ्जरी"
## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
## "मृतोज्जीवनं नाम सप्तमोप

अथापरेद्युः जाग्रदभिलाषपरवशं समारोहणाकङ्क्षया सिंहासनं सस्नेहमवलोकमानं भोजं प्रतिरुन्धती वाक्श्रृङ्खलाभिः एकाऽन्या पुत्तलिका समवदत्- महाराज भोजदेव! विक्रमार्के राज्यं कुर्वति, सर्वोऽपि जनः सुखेनासीत्, लोके दुर्जन- कण्टको नास्ति। सदाचारवन्तः सर्वे जनाः। ब्राह्मणा वेदशास्त्राभ्यास- स्वधर्माचारपराः, षट्कर्मनिरताः बभूवुः। सर्वस्यापि वर्णस्य सिद्धौ यशसि चाभिरुचिः, परोपकारकरणे वासना, असत्ये अप्रणयः, लोभ द्वेषः परापवादे अनादरः, जीवदयाम् अनुरागः, परमेश्वरे भक्तिः, देहे निर्म्मता, नित्यानित्यवस्तुनि विचार, परत्र विषये बुद्धिः, वाचि सत्यम्, उक्तिपरिपालने दार्ढ्यं, हृदये औदार्यगुणः। एवं सर्वोऽपि लोकः सद्वासनाऽऽश्रितः, पवित्रीभूतान्तःकरणो राज्ञः प्रसादात् सुखेन वर्त्तते। तस्मिन् नगरे धनदो नाम कश्चित् वणिक् अस्ति। तस्य सम्पत्तेर्मर्य्यादानास्ति; येन यद्वस्त चिन्त्यते तद्वस्त तस्य गृहे लभ्यते। एवं सकलसम्पदाश्रयस्य वणिजः सर्ववस्तुषु अनित्यत्व- बुद्धिरुत्पन्ना- असारोऽयं संसारः, सर्वं सुदुर्लभमपि वस्तुजातमनित्यम्।

इति बहुधा विचार्य्य श्रोत्रियान् ब्राह्मणानाहूय तेषां सकाशात् हेमाद्रिप्रतिपादितानि दानखण्डोक्त- गोदान- कन्यादान- विद्यादान- भूदानोदकदानानि श्रुत्वा, तानि दानानि सत्पात्रे समर्प्य पवित्रान्तःकरणः सन् पुनर्विचारयति स्म- "मयैतदनुष्ठितं दानव्रतादिकं तदा सफलं भविष्यति- यदा द्वारावतीं गत्वा श्रीकृष्णं द्रक्ष्यामि" इति विचार्य्य श्रीनिवासपुरीं प्रति निर्गतः. अथ समुद्रतीरं गत्वा नाविकमाहूय तस्मै भूरिं द्रव्यं दत्त्वा, भिक्षुक- योगि- विदेशस्थ- जनानाथादीनारोप्य तैः सह प्रियवचनानि धर्म्मगोष्ठीः कुर्वन् यावत् गच्छति तावत् समुद्रमध्ये कश्चित् क्षुद्रपर्वतो दृष्टः |तत्र पर्वते महानेकः देवालयः आसीत्। ततस्तं देवालयं गत्वा देवीं भुवनेश्वरीं षोडशोपचारैरभ्यर्च्य नमस्कृत्य च यावत्तस्या वामभागे दृष्टिं निदधाति तावच्छिन्नशीर्षं स्त्रीपुरुषयोर्युगलं दृष्ट्वा पुरःस्थितभित्तिभारो लिखितानि अक्षराणि अपश्यत्- "यदि कोऽपि परोपकारी महाध्यैर्यसम्पन्नः स्वकण्ठारुधिरेण भुवनेश्वरीमर्चयति, तदैतत् स्त्रीपुरुषयुगलं सजीवं भविष्यति" इति, एवं लिखितं वाचयित्वा सविस्मयो धनदः पुनरपि नावामारुह्य द्वारावतीं गतः तत्र श्रीकृष्णं दृष्ट्वा- इति श्रीकृष्णप्रणामस्य मोक्षफलसाधनतां सचिन्त्य, तं साष्टांङ्गं प्रणम्य षोडशोपचारैः सम्पूज्य च निजनगरमगमत्। ततः सर्वान् बन्धुन् श्रीकृष्णप्रसाददानेन सम्भाव्य, किमप्यपूर्वं वस्तु गृहीत्वा राजदर्शनार्थं गतः। यतः- "रिक्तपाणिस्तु नो पश्येद्राजानं देवतां गुरुम्। नैमित्तिकं विशेषण फलेन फलमादिशेत्।।"




# श्रीकृष्णजन्माष्टमीपर्व



हिमसंस्कृतवार्ता
✍ असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

अस्मिन् प्रवर्तमाने वर्षे, खिष्टमतेन ४-सितम्बर, २०२६' तमे दिनाङ्के, शुक्रवासरे श्रीकृष्णभगवतः प्रादुर्भावतिथिः वर्तते। भाद्रपद-कृष्णपक्षस्य अष्टमीतिथौ रोहिणी नक्षत्रे, अर्धरात्रौ च कारागारे स भगवान्, देवकी-वसुदेवयोः पुत्ररूपेण जन्म लब्धवान्। स साक्षात् विष्णुरूपो भूमिभारहरणाय आविर्भूतः आसीत्। मथुराराज्ञः कंसस्य अत्याचारः उत्तुङ्गतां गतः आसीत् तदा। लीलापुरुषोत्तमस्य भगवतः श्रीकृष्णस्य अस्यां भारतपुण्यभूमौ यत् अवतरणं सञ्जातं तत् अधर्मस्य विनाशार्थम्, धर्मस्य पुनः प्रतिष्ठापनार्थम्, सत्कर्माणां संस्थापनार्थं, भक्तानां, साधुसज्जनपुरुषाणाञ्च साक्षात् अनुकम्पार्थमेव आसीत्। भगवतः जन्म कर्म च दिव्यं भवति, एवं तज्जन्म लोकसङ्ग्रहार्थं लोकशिक्षणार्थं च भवति। भगवतः दिव्यं चरितम् अत्यन्तं मङ्गलमयम् एवं परमं पवित्रं भवति। तस्य भगवतः जीवनचर्या तथा सदुपदेशः अखिललोकार्थं महान् कल्याणकारी वर्तते। श्रीमद्भागवतपुराणादिषु भगवतः श्रीकृष्णस्य महनीयं लोककल्याणकारि निदर्शनं प्राप्यते, तथा तद्भगवतः जन्मतः परमधामप्राप्तिपर्यन्तं कृतकर्माणां मार्मिक-प्रसङ्गानां वर्णनम् उपलभ्यते। स्वलीलामाध्यमेन, उपदेशमाध्यमेन च लोकनायकः श्रीकृष्णः लोकाय महतीं शिक्षां प्रदत्तवान्। श्रीमद्भगवद्गीता तु प्रभोः साक्षात् मुखनिस्सृता वाणी हि वर्तते, यत्र च कर्मयोगस्य, ज्ञानयोगस्य, भक्तियोगस्य च विषये सम्यग्रीत्या विशदीकृतं वर्तते। प्रायः सार्धपञ्चसहस्राधिकवर्षाणां पूर्वं वृष्णिवंशीय-वासुदेवस्य पत्नी-देवक्याः गर्भतः, दुराचारिणः मातुलस्य कंसस्य कारागृहे, भाद्रमासस्य कृष्णाष्टमीतिथौ, रोहिणीनक्षत्रे, मध्यरात्रौ च श्रीकृष्णस्य जन्म अभूत्। आभारतं प्रतिवर्षम् इदं जन्माष्टमीपर्व श्रद्धालुभिः हिन्दुजनैः अद्यापि सुष्ठुतया परिपाल्यते। तस्याम् एव रात्रौ कंसस्य हननभयात्, शिशुं तस्मात् संरक्षणाय च, तं शिशुम् एकस्मिन् कण्डोले संस्थाप्य, तं कण्डोलं शिरसि निधाय, वहन् च वासुदेवः कष्टेन यमुनानदीं तीर्त्वा गोकुले स्थितस्य गोपबन्धोः नन्दस्य गृहं प्राविशत्, नन्देन समालोच्य तं शिशुं तत्रैव संस्थाप्य कारां प्रत्यागतवान्। यथासमयं तत्र कुलपुरोहितेन गर्गऋषिणा तस्य शिशोः नामकरणं विहितं, कृष्णः इति तस्य नाम च प्रसिद्धं जातम्। कालक्रमेण सः किशोरावस्थां प्राप्नोत्। तस्य असाधारणैः कर्मभिः वृन्दावनवासिनः, मथुरावासिनः एवञ्च द्वारकावासीनः सर्वेऽपि विमोहिताः उपकृताश्च सञ्जाताः आसन्। न केवलं भारतवासिनः एव, अपिच विश्ववासिनः हि तस्य अलौकिककार्यैः आश्चर्यचकिताः जाताः। सः विशाले भूखण्डे अप्रतिद्वन्द्वी इति स्वीकृतिं लब्धवान् आसीत्। विशेषतः पाण्डवानां राजसूययज्ञे भीष्मपितामहस्य परामर्शानुसारं युधिष्ठिरः तस्मै प्रथमं राजकीयसम्मानं प्रदत्तवान् आसीत्। महतः नायकस्य भगवतः श्रीकृष्णस्य जन्मानन्तरं भारतस्य स्थाने स्थाने जरासन्धः, शिशुपालः, शाल्वः, प्रवञ्चकः दुर्योधनः, देशस्य पूर्वाञ्चले अपि वाणासुरः, नरकासुरः इत्यादयः नैके अशुभशक्तिसम्पन्नाः दुराचारिणः राजानः सर्वसाधारणजनानाम् उपरि स्वैराचारिशासनं, शोषणं च निर्बाधम् आचरितवन्तः आसन्। श्रीकृष्णः तान् सर्वान् एकैकशः निगृह्य हतवान् च। कारागारे स्थितौ अतीव दुःखिनौ, सन्तप्तौ च मातापितरौ ततः विमोच्य कंसस्य वृद्धपितरम् उग्रसेनं नैकाश्च सत्यपरायणान् न्यायनिष्ठान् कारावासिनः कंसस्य कारातः विमुक्तवान्। पुनः उग्रसेनं राजसिंहासने संस्थापितवान्। बाल्ये किशोरावस्थायां प्रौढवयसि च अर्थात् स्वकीये पूर्णजीवने तेन नानाविधाः अलौकिक्यः लीलाः रचिताः। कुवलयापीडोद्धारः, कंसवधः, पित्रोः बन्धनमुक्तिः, उग्रसेनस्य राज्याभिषेकः, जाम्बवत्याः परिणयः, रुक्मिणीहरणं, स्यमन्तमण्युद्धारः, शिशुपालवधः, सुदाम्नः सत्कारः, मातुः देवक्याः अन्यपुत्रान् आनयनम् एवमेव कालीयदमनम्, गोवर्धनधारणम्, इन्द्रस्य ब्रह्मणश्च अहङ्कार-भञ्जनम्, गोपीभिः सह रासक्रीडा इत्यादयः नानाविचित्राः लीलाः तेन रचिताः। यदा कौरवाणां पाण्डवानाञ्च मध्ये यो महान् संग्रामो जातः, तत्र तु भगवतः श्रीकृष्णस्य हि भूमिका महत्त्वभूता, मुख्या च आसीत्। तस्मिन् महारणे श्रीकृष्णः सत्य-न्याय-धर्मपरायणं पाण्डवपक्षम् अङ्गीकृतवान्। अर्जुन-रथस्य सारथित्वेन तेन पूर्णं साहाय्यं कृतम्। प्रथमतः आत्मीयान् स्वजनान् परितः दृष्ट्वा तुच्छसिंहासनस्य लोभेन कथं वा स्वजनैः सह योद्धव्यम् इति विचिन्त्य करुणया अर्जुनः युद्धं कर्तुं निराकरोत्। परन्तु कौरवाणाम् अन्यायात्याचारादिकं ध्वस्तीकर्तुं श्रीकृष्णः नानाज्ञानवचनैः अर्जुनं समाश्वास्य वारं वारं युद्धार्थं प्रेरितवान्। भगवत्कृपया अर्जुनः अन्ते आत्मज्ञानं प्राप्य युद्धार्थं सन्नद्धः अभवत्। घोरः सङ्ग्रामः जातः, अस्मात् अत्याचारिणः कौरवाः ध्वंसीभूताः; दुर्वृत्तानाम् अन्यायात्याचारादिकं सर्वमपि समाप्तं जातम्। भगवतः अवतरणं हि लोकहिताय, धर्मस्थापनाय, मार्गदर्शनाय च भवति। श्रीकृष्णः स्वयमेव परमेश्वरः, महान् नायकश्च आसीत्। परमपुरुषस्य भगवतो वर्णनं समान्यलेखेन पूर्णतो न शक्यते। यतोहि श्रीकृष्णस्य चरितं सीमारहितम्, अतुलनीयम्, अगम्यं चास्ति। तस्य भगवतः अस्मिन् जन्मपर्वणि, अनेन लेखेन स केवलं स्मरणाय प्रयत्नः कृतो वर्तते इति, शम्।

# संस्कृतभारत्याः हरियाणाकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागस्य च संयुक्ततत्त्वाधाने महेन्द्रगढस्य जांटग्रामे संस्कृतसम्भाषणशिविरस्य शुभारम्भम्

भिवानीविभागस्य शिविराभियाने 02/09/2026 दिनाङ्के संस्कृतभारत्याः हरियाणाकेन्द्रीय-विश्वविद्यालयस्य संस्कृतविभागस्य च संयुक्ततत्त्वाधाने महेन्द्रगढस्य जांटग्रामे संस्कृतसम्भाषणशिविरस्य शुभारम्भम् अभवत्। विभागाध्यक्षा प्रो. पायलकंवरचंदेलमहोदया उक्तवती यत् संस्कृतविभागः संस्कृतस्य प्रचार-प्रसाराय संलग्नोऽस्ति। पाली-जांटग्रामौ तु विश्वविद्यालयस्य दत्तकग्रामौ स्तः, अतः वयं जांटग्रामतः एव प्रारम्भः कुर्मः। भविष्ये एतादृशाः कार्यक्रमाः नैरन्तर्येण प्रचलिष्यामः। अस्मिन् शिविरे 12/09/2026 दिनाङ्कपर्यन्तं विभागीयशिक्षकः डा. सुमितशर्मा प्रतिदिनं सायंकाले जांटग्रामस्य श्रीबालाजीमन्दिरे शिविरं चालयति। हिन्दू-अध्ययनविभागस्य छात्रौ आशीषकृष्णौ शिविरे विशेषसहयोगं दत्तवन्तौ।





# कृष्णावतारकाले समाजस्य स्थितिः (पर्वविशेषः)

**करारविन्देन पदारविन्दं,**
**मुखारविन्दे विनिवेशयन्तम्।**
**वटस्य पत्रस्य पुटे शयानं,**
**बालं मुकुन्दं मनसा स्मरामि॥**

भारतीयसंस्कृतौ भगवतः श्रीकृष्णस्य व्यक्तित्वं बहुमुखी, प्रभावशाली च अस्ति। एषः केवलं धार्मिकपुरुषः न, अपितु दार्शनिकः, राजनीतिज्ञः, कूटनीतिज्ञः, समाजसुधारकः, लोकनायकः, धर्मसंस्थापकश्च आसीत्। भगवद्गीतायां स्वयं भगवान् श्रीकृष्णः कथयति—
“यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥” इति।
अतः कृष्णावतारस्य पृष्ठभूमौ तत्कालीनस्य समाजस्य स्वरूपं विशेषतया विचारणीयम् अस्ति।
श्रीकृष्णस्य अवतारकालः भारतीयपरम्परायां द्वापरयुगस्य अन्तिमभागे मन्यते। तस्मिन् समये समाजे धर्मस्य च अधर्मस्य च संघर्षः तीव्रः आसीत्। राजसत्तायाः दुरुपयोगः, प्रजापीडनम्, पारिवारिककलहः, राजनीतिकप्रतिस्पर्धा, युद्धस्य वातावरणं च समाजस्य शान्तिं बाधन्ते स्म। तथापि तस्मिन् काले भारतीयसमाजे धर्मः, संस्कारः, गुरुपरम्परा, यज्ञः, विद्या, कृषि, गोपालनम्, लोकाचारः च सुदृढाः आसन्। अतः कृष्णावतारकालीनः समाजः केवलं दोषपूर्णः नासीत्; सः गुणदोषसमन्वितः समाजः आसीत्।

## १. राजनीतिकस्थितिः

कृष्णावतारकाले राजतन्त्रं प्रमुखं शासनव्यवस्थारूपेण प्रचलितम् आसीत्। विभिन्नेषु प्रदेशेषु विभिन्नाः राजानः स्वस्वराज्यानि शासयन्ति स्म। मथुरा, हस्तिनापुरम्, इन्द्रप्रस्थम्, द्वारका, मगधादयः प्रमुखानि राजनीतिककेन्द्राणि आसन्। मथुरायां कंसस्य शासनं विशेषतया अत्याचारी आसीत्। सः स्वपितरं उग्रसेनं पदच्युतं कृत्वा स्वयं राज्यसिंहासने आरूढवान्। तेन प्रजासु भयस्य वातावरणं निर्मितम्। कंसस्य अत्याचारः केवलं राजपरिवारं प्रति सीमितः नासीत्, अपितु सामान्यप्रजाजनाः अपि तस्य शासनात् पीडिताः आसन्। देवकीवसुदेवयोः विवाहसमये आकाशवाणीं श्रुत्वा कंसस्य मनसि भयम् उत्पन्नम् अभवत्। तेन देवकी-वसुदेवौ कारागारे स्थापितौ। कृष्णस्य जीवनचरिते कंसवधः केवलं व्यक्तिगतप्रतिशोधस्य घटना नास्ति। सः अत्याचारीराजसत्तायाः विरुद्धं धर्मस्य विजयस्य प्रतीकः अस्ति। कृष्णः कंसं हत्वा उग्रसेनं पुनः राजसिंहासने स्थापयित्वा प्रजाहितस्य आदर्शं प्रस्तुतवान्।

## २. राज्ञां कर्तव्यभावना

आदर्शभारतीयपरम्परायां राजा प्रजापालकः मन्यते स्म। राज्ञः प्रमुखं कर्तव्यं प्रजानां रक्षणं, न्यायस्य स्थापना, धर्मस्य संरक्षणं च आसीत्। किन्तु कृष्णावतारकाले सर्वे राजानः आदर्शाः न आसन्। केचन राजा स्वार्थपराः, विलासप्रियाः, विस्तारवादिनः च आसन्। कौरवपाण्डवयोः संघर्षः तत्कालीनराजनीतेः जटिलतां प्रकाशयति। हस्तिनापुरस्य राजपरिवारस्य अन्तर्कलहः शनैः शनैः महायुद्धस्य कारणम् अभवत्। दुर्योधनस्य राज्यलोभः, शकुनेः कूटनीतिः, धृतराष्ट्रस्य पुत्रमोहः च परिस्थितिं अधिकं विषमां कृतवन्तः। श्रीकृष्णः अनेकवारं शान्तिस्थापनाय प्रयत्नं कृतवान्। पाण्डवानां कृते केवलं पञ्चग्रामान् याचितवान्। अस्याः घटनायाः माध्यमेन ज्ञायते यत् युद्धं कृष्णस्य प्रथमः विकल्पः नासीत्। एषः सर्वदा धर्मसम्मतं शान्तिपूर्णं समाधानं इच्छति स्म। किन्तु अधर्मस्य हठस्य च कारणेन युद्धम् अनिवार्यमभवत्।

## ३. सामाजिकजीवनम्

कृष्णावतारकाले समाजः बहुविधैः समुदायैः निर्मितः आसीत्। ग्राम्यजीवनं तदा अत्यन्तं महत्त्वपूर्णम् आसीत्। कृषकाः, गोपालकाः, शिल्पिनः, व्यवसायिनः, सैनिकाः, विद्वांसः च समाजस्य विभिन्नान् वर्गान् निर्मान्ति स्म।
व्रजस्य जीवनं विशेषरूपेण सरलम् आसीत्। नन्दः, यशोदा, गोपाः, गोपिकाः, बालकाः च परस्परं स्नेहेन जीवनं यापयन्ति स्म। गोपालनं तेषां जीवनस्य प्रमुखः आधारः आसीत्। गावः प्रति सम्मानं भारतीयसंस्कृतेः महत्त्वपूर्णं वैशिष्ट्यम् आसीत्। व्रजसमाजे उत्सवाः, क्रीडाः, गीतानि, नृत्यानि, धार्मिकाचाराः च जनजीवनस्य अभिन्नाः भागाः आसन्। श्रीकृष्णस्य बाललीलाः तस्य समाजस्य सहजतां, प्रेमभावं, सामुदायिकजीवनं च प्रकाशयन्ति।

## ४. वर्णव्यवस्था

तस्मिन् समये समाजे वर्णव्यवस्था प्रचलिता आसीत्। ब्राह्मणाः अध्ययन-अध्यापन-यज्ञादिकर्मसु प्रवृत्ताः भवन्ति स्म। क्षत्रियाः प्रजारक्षणं, शासनं, युद्धं च कुर्वन्ति स्म। वैश्याः कृषिं, पशुपालनं, वाणिज्यं च वहन्ति स्म। शूद्राः विविधेषु सेवाकार्येषु तथा शिल्पकार्येषु संलग्नाः आसन्।भगवद्गीतायां श्रीकृष्णः वर्णव्यवस्थायाः आधारं “गुणकर्मविभागशः” इति प्रतिपादयति। अस्य तात्पर्यम् अस्ति यत् सामाजिककर्तव्यस्य निर्धारणे व्यक्तेः गुणः कर्म च महत्त्वपूर्णौ स्तः। तथापि कालान्तरे वर्णव्यवस्था जन्माधारितरूपेण कठोरतां प्राप्तवती इति ऐतिहासिकदृष्ट्या चर्च्यते। श्रीकृष्णस्य उपदेशे कर्मप्रधानता विशेषतया दृश्यते। अतः समाजे स्वकर्तव्यपालनस्य महत्त्वम् एतेन प्रतिपादितम्।

## ५. स्त्रीणां स्थितिः

कृष्णावतारकालीनसमाजे स्त्रीणां स्थानं महत्त्वपूर्णम् आसीत्, यद्यपि तासां सामाजिकस्वतन्त्रतायाः सीमाः अपि आसन्। देवकी, यशोदा, कुन्ती, द्रौपदी, गान्धारी, सुभद्रा, रुक्मिणी इत्यादयः स्त्रियः समाजे प्रभावशालिनीः आसन्। यशोदा मातृत्वस्य आदर्शं प्रस्तुतयति। देवकी त्यागस्य प्रतीकत्वेन दृश्यते। कुन्ती धैर्यस्य, द्रौपदी स्वाभिमानस्य तथा न्यायस्य च प्रतीकरूपेण प्रतिष्ठिता अस्ति। रुक्मिणी स्वविवाहसम्बन्धे स्वेच्छां स्पष्टतया प्रकटयति।
द्रौपद्याः सभायां यत् अपमानं जातम्, तत् तत्कालीनसमाजस्य नैतिकपतनस्य एकं गम्भीरं उदाहरणम् अस्ति। सभायाम् उपस्थिताः महापुरुषाः अपि तस्याः रक्षणे तत्कालं समर्थाः न अभवन्। एषा घटना समाजे नारीसम्मानस्य आवश्यकतां स्पष्टयति।

## ६. शिक्षा-व्यवस्था

कृष्णावतारकाले गुरुकुलशिक्षापद्धतिः प्रचलिता आसीत्। विद्यार्थी गुरोः आश्रमे निवसन्तः अध्ययनं कुर्वन्ति स्म। शिक्षा केवलं पुस्तकीयज्ञानं नासीत्; अपितु चरित्रनिर्माणम्, आत्मसंयमः, विनयः, कर्तव्यबोधः, शास्त्रज्ञानं, धनुर्विद्या, राजनीतिज्ञानं च शिक्षायाः भागाः आसन्।
श्रीकृष्णः तथा बलरामः सान्दीपनेः आश्रमे शिक्षां प्राप्तवन्तौ इति परम्परायां प्रसिद्धम्। अर्जुनादयः अपि द्रोणाचार्यात् विविधविद्याः अधीतवन्तः।
गुरुशिष्यसम्बन्धः अत्यन्तं पवित्रः मन्यते स्म।
क्रमशः...

विद्यार्थी गुरोः प्रति श्रद्धां वहन्ति स्म तथा गुरुश्च शिष्यस्य सर्वांगीणविकासाय प्रयत्नं करोति स्म। एतादृशी शिक्षा व्यक्तित्वनिर्माणस्य आधारः आसीत्।

## ७. आर्थिकस्थितिः

कृष्णावतारकालीनसमाजस्य अर्थव्यवस्था मुख्यतया कृषिप्रधानाः आसीत्। कृषि, पशुपालनं, वाणिज्यं, शिल्पकर्म च जनजीवनस्य प्रमुखाः आधाराः आसन्।व्रजप्रदेशे गोपालनस्य विशेषं महत्त्वम् आसीत्। दुग्धं, दधि, घृतं, नवनीतं च जनजीवनस्य आवश्यकाः पदार्थाः आसन्। गोवर्धनपूजायाः प्रसङ्गः प्रकृत्या, पर्वतेन, गोभिः, कृषिजीवनेन च मनुष्यस्य सम्बन्धं दर्शयति।
श्रीकृष्णेन गोवर्धनधारणस्य प्रसङ्गे इन्द्रपूजायाः स्थानं गोवर्धनपूजया परिवर्तितम्। अस्य घटनायाः सामाजिकार्थः अपि अस्ति यत् समाजस्य वास्तविकजीवनाधाराः कृषिः, गोपालनं, प्रकृतिसम्पदा च इति श्रीकृष्णः बोधयति।
द्वारिकायां व्यवसायस्य समुद्रमार्गस्य च विकासः आसीत् इति भारतीयपरम्परायां वर्णितम्। अतः कृष्णकालीनभारते आन्तरिक-वाणिज्यस्य तथा बाह्यवाणिज्यस्य सम्भावना अपि दृश्यते।

## ८. धार्मिकस्थितिः

धर्मः तत्कालीनसमाजस्य जीवनस्य प्रमुखः आधारः आसीत्। यज्ञाः, देवपूजा, व्रतानि, संस्काराः, तीर्थयात्राः च प्रचलिताः आसन्। ब्राह्मणानां धार्मिककार्येषु विशेषं स्थानम् आसीत्।
किन्तु धर्मस्य बाह्याचाररूपेण वृद्धिः अपि कदाचित् समस्यां जनयति स्म। श्रीकृष्णः धर्मस्य आन्तरिकस्वरूपं प्रतिपादयति। एतस्य दृष्टौ धर्मः केवलं कर्मकाण्डः न, अपितु सत्यं, न्यायः, स्वकर्तव्यपालनं, आत्मसंयमः, लोकसङ्ग्रहः च अस्ति।भगवद्गीतायां एषः अर्जुनं कर्मयोगस्य उपदेशं ददाति—
"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।"
अनेन उपदेशेन कर्मणः महत्त्वं स्पष्टं भवति। मनुष्यः स्वकर्तव्यं निष्कामभावेन कुर्यात् इति श्रीकृष्णस्य सन्देशः आसीत्।

## ९. नैतिकस्थितिः

समाजे नैतिकमूल्यानि विद्यमानानि आसन्, किन्तु तेषां ह्रासः अपि दृश्यते स्म। सत्यं, दया, त्यागः, गुरुसेवा, मातृ-पितृभक्तिः, अतिथिसत्कारः, मित्रता च आदरणीयाः आसन्। सुदामाकृष्णयोः मैत्री अस्य सुन्दरम् उदाहरणम् अस्ति। बाल्यकालीनमित्रता कालान्तरे राजवैभवेन न परिवर्तिता अभवत्। श्रीकृष्णः निर्धनमित्रं सुदामानं प्रेम्णा स्वीकृतवान्। अत्र सामाजिकसमानता, मित्रता, प्रेम च प्रमुखतया प्रकाशते। अन्यत्र दुर्योधनस्य ईर्ष्या, कंसस्य क्रूरता, शकुनेः कपटनीतिः, दुःशासनस्य द्रौपदीं प्रति दुर्व्यवहारः इत्यादयः नैतिकपतनस्य उदाहरणानि सन्ति।

## १०. परिवारव्यवस्था

परिवारः तत्कालीनसमाजस्य मूलभूतः आधारः आसीत्। संयुक्तपरिवारस्य परम्परा सुदृढा आसीत्। माता-पिता, भ्रातरः, भगिन्यः, पितामहाः, अन्ये बान्धवाः च एकत्र निवसन्ति स्म। श्रीकृष्णस्य जीवनमेव परिवारस्य विविधरूपाणि दर्शयति। जन्मना एषः देवकीवसुदेवयोः पुत्रः, पालनपोषणकारणात् यशोदानन्दयोः पुत्रः च अभवत्। अनेन मातृत्वस्य केवलं जैविकसम्बन्धेन न, अपितु प्रेम्णा सेवया च निर्माणं भवति इति भावः प्रकटते।पाण्डवकौरवयोः परिवारकलहः तु परिवारव्यवस्थायाः दुर्बलतां प्रदर्शयति। भ्रातृप्रेम्णः स्थाने स्पर्धा तथा ईर्ष्या आगता चेत् परिवारः विनाशस्य कारणं भवितुम् अर्हति—महाभारतस्य कथा अस्य महत्त्वपूर्णं शिक्षणं ददाति।

## ११. युद्धस्य वातावरणम्

कृष्णावतारकाले अनेकानि राज्यानि परस्परं युद्धरतानि आसन्। राज्यविस्तारः, प्रतिष्ठा, धनसम्पत्तिः, राजसत्ता च युद्धस्य प्रमुखानि कारणानि आसन्। महाभारतयुद्धं तत्कालीनसमाजस्य व्यापकं राजनीतिकं तथा नैतिकं संकटं प्रदर्शयति। अस्मिन् युद्धे केवलं सैनिकाः न, अपितु सम्पूर्णं सामाजिकतन्त्रं प्रभावितम् अभवत्।
श्रीकृष्णः स्वयं शस्त्रं न गृह्णीयामिति प्रतिज्ञां कृत्वा अर्जुनस्य सारथित्वं स्वीकृतवान्। अनेन एषः दर्शितवान् यत् नेतृत्वस्य अर्थः सदा अग्रे स्थित्वा शस्त्रेण युद्धं न, अपितु उचितसमये उचितमार्गदर्शनकार्यम् अपि अस्ति।

## १२. प्रकृत्या सह सम्बन्धः

तत्कालीनसमाजस्य जीवनं प्रकृत्या सह अत्यन्तं निकटम् आसीत्। नद्यः, वनानि, पर्वताः, गावः, कृषिक्षेत्राणि च जनजीवनस्य अभिन्नानि अङ्गानि आसन्।वृन्दावनस्य वर्णनं प्रकृतिसौन्दर्येन परिपूर्णम् अस्ति। यमुना, गोवर्धनः, वनानि, लताः, वृक्षाः, पशवः च श्रीकृष्णस्य बालजीवनस्य पृष्ठभूमिं निर्मान्ति। गोवर्धनप्रसङ्गः प्रकृतिसंरक्षणस्य दृष्ट्या अपि महत्त्वपूर्णः अस्ति। मनुष्यस्य जीवनं प्रकृत्या सह अविच्छिन्नरूपेण सम्बद्धम् अस्ति। अतः प्रकृतेः संरक्षणं मानवजीवनस्य संरक्षणमेव अस्ति।

## १३. श्रीकृष्णस्य सामाजिकसन्देशः

श्रीकृष्णस्य अवतारस्य मूलोद्देश्यं धर्मस्य पुनर्स्थापनम् आसीत्। एषः केवलं कंसं वा कौरवान् वा पराजितवान् इति न, अपितु मानवजीवनाय नवीनदृष्टिकोणं प्रदत्तवान्।
एतस्य शिक्षायाः प्रमुखाः आधाराः सन्ति—
धर्मस्य संरक्षणम्।अधर्मस्य प्रतिरोधः।
स्वकर्तव्यस्य पालनम्।निष्कामकर्म।
सत्यस्य पक्षग्रहणम्।अन्यायस्य विरोधः।
मित्रता तथा प्रेम।प्रकृतेः संरक्षणम्।
लोककल्याणस्य भावना।आत्मसंयमः तथा योगः।
गीतायाःउपदेशे एषः अर्जुनं मोहात् उद्धृत्य कर्तव्यपथे स्थापयति। एतस्य सन्देशः केवलं अर्जुनाय न, अपितु समस्तमानवजातये उपयोगी अस्ति। कृष्णावतारकालीनः समाजः बहुविधविशेषताभिः सम्पन्नः आसीत्। तत्र यदि धर्मः, संस्काराः, गुरुकुलव्यवस्था, परिवारव्यवस्था, कृषिः, गोपालनम्, मित्रता, सामाजिकसहकारिता च दृढाः आसन्; तर्हि राजकीयस्वार्थः, अत्याचारः, ईर्ष्या, अन्यायः, स्त्रीणामवमानना, पारिवारिककलहः तथा युद्धप्रवृत्तिः अपि वर्धमाना आसीत्।अतः कृष्णावतारस्य आवश्यकता केवलं धार्मिकदृष्ट्या न, सामाजिकदृष्ट्या अपि आसीत्।



**श्रीकृष्णः अधर्मस्य विनाशं कृत्वा धर्मस्य स्थापना कृतवान्। एतस्य जीवनं दर्शयति यत् समाजस्य वास्तविकम् उत्थानं केवलं शासनपरिवर्तनेन न, अपितु मानवानां चिन्तनस्य, आचरणस्य, नैतिकमूल्यानां च परिवर्तनात् भवति।**

श्रीकृष्णस्य सन्देशः अद्यापि प्रासङ्गिकः अस्ति। यदा समाजे अन्यायः, भ्रष्टाचारः, हिंसा, लोभः, स्वार्थः, नैतिकपतनं च वर्धते, तदा श्रीकृष्णस्य "परित्राणाय साधूनां विनाशाय च दुष्कृताम्।धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति भावना अस्मान् धर्मस्य, सत्यस्य, न्यायस्य च मार्गे गन्तुं प्रेरयति।अतः कृष्णावतारकालीनसमाजस्य अध्ययनं केवलं प्राचीनेतिहासस्य अध्ययनं न, अपितु वर्तमानसमाजस्य समस्यासु समाधानमार्गस्य अन्वेषणमपि अस्ति। श्रीकृष्णस्य जीवनदर्शनं मानवजीवनाय शाश्वतं मार्गदर्शनं प्रददाति—धर्मे स्थित्वा कर्म करणीयम्, अन्यायस्य विरोधः करणीयः, लोकहितं चिन्तनीयम्, सत्यं च सर्वदा संरक्षितव्यम्। सर्वेभ्यः भक्तजनेभ्यः भगवतः श्रीकृष्णस्य जन्मोत्सवस्य हार्दिकी शुभकामना।
अन्ते च-

**"श्रीकृष्णाय वासुदेवाय हरये परमात्मने।**
**प्रणतक्लेशनाशाय गोविन्दाय नमो नमः।।"**

इत्यलम्।।

**डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बरारी,भागलपुर, बिहार**